मभ्यसेत् यावत्केवलसिद्धिःस्यात्तावत्सहितमभ्यसे

दि३

त् ३९१ केवलेकुंभकेसिद्धेरेचपूरकवर्जिते
नतस्यदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते ३९२ म
नोजवत्वंलभतेपलितादिविनश्यति मुक्तेरयंमहाम
र्गोमकारारव्योन्नकारकः ३९३ नादस्तोत्पाद्यते
मकुंभकःप्राणसंयमः प्राणसंयमनंनामदेहेप्राण

द्विधारणं ३२४ एवं प्राणजयोपाय सर्व्वमृत्यु
निवारणः किंचित्प्राणजयोपायं तव वक्ष्यामि पार्व्व
ति ३२५ वाह्यात्प्राणं समाकृष्य वाह्यवायुर्विघात
कं वह्निस्थानं निरुध्येत वायुं तत्रैव धारयेत् ३२६
हस्ताभ्यां वन्धयेत्सम्यक् कर्णादिकरणानि च अंगु
ष्ठाभ्यां तु भवेच्छ्रोत्रे तर्जनीभ्यां च चक्षुषी ३२७ नासा
द्वयमथान्याभ्यां सम्यक्पिदिनिवोधयेत् सुखस्तुत्य
यतेनादः शुद्धस्फटिकसन्निभ ३२८ ब्रह्मग्रन्थेस्तु
न्नायां मृणालान्तरसूत्रवत् आपूर्ह्वं वर्त्ततेनादो वीण
दण्डवत्स्थितः ३२९ शंखध्वनिनिभस्त्वादौ मध्ये मेघ

ध्वनिर्यथा व्योमरंध्रंगतेनादेगिरिश्रवणेंतथा ४००
व्योमरंध्रगतेवायौ मनसास्वसहेंद्रियैः तदानादी
नवेद्देही वायुस्तेनजितोभवेत् ४०१ योगिनस्तुपरे
येतु वदन्तितमशाब्दजं प्राणायामपरांप्लुता ऐवपूर
कवर्जिताः ४०२ दक्षिणेनतुगुल्फेन सीवनींपाः

ड्यष्ठिवां अधस्तादण्डयोः सूक्ष्मां सव्योपरिस्थितदक्षि
णं ४०३ जंघोर्द्धोरंतरेसम्यक्क्षिप्तंद्वंबन्धयेद्दृढं स
मग्रीवशिरोवक्षःसमपृष्ठःसमोदरः ४०४ नेत्राभ्यां
दक्षिणंगुल्फं संपश्यन्तुपरिस्थितं भावयन्मनसासा
र्द्धं व्याहरन्प्रणवाक्षरं ४०५ आसनेनानयाक्षीणस्तेरः

हस्यो विजितेन्द्रियः श्वायुर्विघातकः प्राणस्त्वनेनापि
स्थलंगतः ४०६ वाह्यातिष्ठतितत्रैव वह्निनासहः
निश्चितं धूमध्वजजयंयावत्तावन्धीरेवमभ्यसे ४०७
त्वाहाप्रियनयाप्राणं शनैःशनैरोहयेत्ततः नेत्राभ्यां
लोकयन्नाग्निं मनसाप्रणवंजपत् ४०८ तिष्ठत्य
ग्निनातत्प्राणो मद्द्वंनाभेरधःस्थितः एतेननाभिम
ध्यस्थ धारणेनैवयावत ४०९ कुण्डलीनिवः
क्लिष्टं दहत्यत्रनसंशयः ततस्तवह्निनानागप्रबोः
धेनाडिवायुना ४१० प्रबुद्धेसंस्मरत्याश्रिन्वायु
मारोहयेत्ततः उत्सरन्ध्रेसुषुम्नायांध्यायन्तुॐका

रमक्षरं ४११ शनैरारोहयेन्मूर्द्ध्नि सात्विंवायुमन
न्यधीः धारयेद्व्योम्नि देवेशि सान्निंप्राणांसमाहितः
४१२ तेनैवपूरितेव्योम्नि सांगोपांगेकलेवरे तदा
त्माराजतेतत्र यथाव्योम्नि दिवाकरः शरीरंचस्तुत्वः
क्त्वा देवंध्यानंसमाधिवत् एकाक्षरंपरंब्रह्म ध्याय
न्परमभीश्वरं ४१३ संयोज्यमनसामूर्द्ध्नि ब्रह्मरंध्रं
सवायुना प्राणंतुस्थापयेत्सद्यो न्महाप्राणेथमध्या
मे ४१४ देहादतीतजगति शून्येनित्येध्रुवेपदे आ
काशेपरमानन्दे आत्मानंयोजयेद्द्विजा ४१५ ब्रह्मै
वासौभवेद्देवि नपुनर्जन्मभाग्भवेत् उत्क्रान्त्येतान्निव

त्वाहि योगांगानितुद्धेहि ४६ प्रत्याहाराणि चत्वा
रि शृणुष्वाभ्यन्तराणि च इन्द्रियाणां विचरतां विष
येषु स्वभावतः ४७ बलादाहरणं तेषां प्रत्याहा
रः स उच्यते यद्यत्पश्यति तत्सर्वं पश्येदात्मवदात्मनि
४८ प्रत्याहारः स च प्रोक्तो योगविद्भिर्महात्मभिः

कर्म्माणि यानि नित्यानि विहितानि शरीरिणां ४९
तेषामात्मन्यनुष्ठानं मनसा यद्बहिर्विना प्रत्याहारो
भवेत्सोपि योगसाधनमुत्तमः ५० प्रत्याहारः प्र
शस्तं तत्सेवितं योगिभिः सदा अष्टादशसुच वायोः
र्मर्मस्थानेषु धारणं ५१ स्थानात्स्थानात्समाकृष्य:

प्रत्याहारःसचोत्तमः पादांगुष्ठौचगुल्फौचजंघा
मध्योतथैवच ४२२ जिह्वामूलेचजानोच मध्ये
चोरुद्वयस्यच पायुमूलंचततस्मात् मध्योदेशंच
मेढ्रयोः ४२३ नाभिंचहृदयंचैव कण्ठकूपंत
थैवच तालुमूलंचनासाग्रं मूलंचाक्ष्णोश्चमध्य

मौ ४२४ भ्रुवोर्मध्यंललाटंच मूर्द्धाचत्रिदशे
श्वरि मर्मस्थानित्वैतानि मानंचैषांपृथक्पृथक् ४२५
पादगुष्ठात्तुनालस्य पृथक्ज्ञानंनविद्यते पादांगु
ष्ठात्तुगुल्फस्य सार्द्धगुलचतुष्टयं गुल्फाज्जंघाप्रमा ८
णंतु विज्ञेयंतुदशांगुलं जंघामूलाच्चितेर्मूलंयत्न

देकादशांगुलं ४२६ चितिमूलान्महानागे जा
नुःस्यादंगुलद्वयं जानोर्द्विरंगुलंप्राहु जंघामूलं
तत्वविदः ४२७ ऊरुमध्यान्तथादेवि पादमूलं ततः
षांगुलं देहमध्यान्तथापायुमूलं सार्द्धांगुलद्वयंः
४२८ मेढ्रान्नाभिश्च विज्ञेयं तथासार्द्धदशांगुलं

नेत्रस्थानं तु तन्मूलादर्द्धांगुलमपीष्यते ४२९ त
स्मादर्द्धांगुलं विद्धि भ्रुवोरन्तरमात्मनः ललाटः
संभ्रुवोर्मध्याद्दूर्द्ध्वं स्यादंगुलत्रयं ४३० ललाटस्यो
मस्तकं तु अंगुलद्वयमेव हि स्थानेष्वेतेषु मनसा वायु
मारोप्य धारयेत् ४३१ स्थानात्स्थानं समाकृष्य प्र:

त्याहारविधिर्मतः यएवंकुरुतेविद्वान् यथायोगंय
थाविधि ४३२ सयातिब्रह्मसदनंपुनर्नावर्ततेय
तः अथेदानींप्रवक्ष्यामि धारणांपंचकंशिवे ४३३
समाहितमनाभूत्वा शृणुयत्नेनसादरं यमादिगु
णसंयुक्ता मनसःस्थितिरात्मनि ४३४ धारणाप्रोच्य

तेविज्ञैर्योगशास्त्रार्थविद्भिः हृदयेउदराकाशेयद्वा
प्याकाशधारणं ४३५ एषाहिधारणाप्रोक्तातथैवा
काशगोभवेत् भूमिरापोऽथवातुतेजोवायुराकाशमेव
व ४३६ एतेषुपंचवर्णानांधारणंधारणामता तेष्वे
वपंचवर्णानांधारणंवापिधारणा ४३७ पादादिजा

उपर्य्यन्तं पृथिवीस्थानमुच्यते आजानुपायुपर्य्यन्त
मपांस्थानं प्रकीर्त्तितं ४३८ आपायोर्हृदयं यावद्व
ह्निस्थानं समीरितं आहृन्मध्याद्भ्रुवोर्मध्यं यावद्वायु
स्थलं भवेत् ४३९ आभ्रूमध्यात्तु मूर्द्धान्तं यावदाकाश
मुच्यते एतेषां प्रथमे स्थाने लकारं धारयेद्बुधः ४४०

वकारं धायेदप्सु रेफं वह्नौ च धारयेत् यकारं धारये
द्वायौ हकारं व्योम्नि धारयेत् ४४१ पृथिव्यां धारयेद्दे
वि ब्रह्माणं परमेष्ठिनं विष्णुमप्स्वनले रुद्रं महेशानं तु
मारुते ४४२ आकाशे धारयेद्देवं सर्व्वज्ञं परमेश्वरं
नीत्वा वायुं पृथिव्यां तु वर्णदेवसमन्वितं ४४३ धारये

त्यंचं घटिकाः पृथ्विव्याजयमाप्नुयात् यथोक्तवर्णैः
देवेशं संयोज्य वायुमक्षुत ४४४ धारयेत्पंचघटि
काः सर्व्वरोगैः प्रमुच्यते पूर्व्ववत्कारणेवह्नेर्वह्निनाशो
नदह्यते ४४५ मततंमारुतस्थाने वर्णदेवसमन्वितं
धारयेत्पंचघटिका वायुवद्व्योमगोभवेत् ४४६ आ

काशेवायुमारोप्य वर्णदेवसमन्वितं धारयेत्पंचघ
टिका जीवन्मुक्तोभवेत्प्रिये ४४७ अल्पमूत्रपुरीष
ःस्याद्वपविवुद्धवत्सरात् आसनाच्छयनाद्यपि नयो
गोनश्यतेवसः ४४८ धारणांयदिदं वायोः स्थानेष्वे
तेषुपंचसु पंचमीधारणायस्याज्जन्ममृत्युविनाशि

नी ४४९ ध्यानं संप्रतिवक्ष्यामि श्रृणु देवि समाहिता
ध्यानमेव हि जन्तूनां कारणं बन्धमोक्षयोः ४५० म
र्मस्थानानि नाडीनां संस्थानं पृथक् पृथक् वायूनां स्था
न कर्म्माणि विदित्वा ध्यानमाचरेत् ४५१ ध्यानवायु
स्वरूपाणां वेदनं मनसा भवेत् तवेदं निखिलं वक्ष्ये

तु विन्ध्यदशवन्दिते ४५२ तदेव द्विविधं प्रोक्तं सगुणं
निर्गुणं तथा सगुणं पंचधा प्रोक्तं निर्गुणं चैव सैव हि
४५३ एकं ज्योतिर्मयं शुद्धं सर्वगं व्योमवद्दृढं अत्य
न्तनिर्मलं तत्त्वं मादिमध्यान्तवर्जितं ४५४ अस्थूल
सूक्ष्मानाकाशा स्पर्शमदृश्यमवाक्षुसं अरसं नचगन्धा

४५५

ह्यप्रमेयमजं विभुं अनन्तमजरं नित्यं सदसत्कर्म्म
कारणं सर्व्वाधारं जगद्रूपममृतमजमव्ययं ४५६
अदृश्यं दृश्यमानत्वं वह्निस्थं सर्व्वतोमुखं सर्व्वदृक्सर्व्व
तःपादं सर्व्वस्पृक्सर्व्वतःपरं ४५७ ब्रह्मब्रह्ममयोहं
स्यामितियद्ध्यानं भवेत् तदेवं निर्गुणं ध्यानं सामान्य

परिकीर्त्तितं ४५८ विशेषमधुनावक्ष्ये निर्गुणस्यापि
पार्व्वति एकाज्योतिर्मयीनित्या सर्व्वगाव्योमरूपिणी ४५९
अत्यन्तनिर्मलां शुद्धां आदिमध्यान्तवर्जितां अतिसूक्ष्मा
मनाकाशा अस्पृश्यानामवस्तुकी ४६० कूटस्थामप्यदृ
श्यां च सच्चिदानन्दविग्रहां अगन्धामरसां त्वक्षां अप्रमे

यामन्त्रयमां ४६१ आनन्दामजरांशुक्लां सदसत्स
र्वकारिणीं सर्वाधारांजगद्रूपा मम्रृतंयेवाव्ययाम
जां ४६२ अनवस्थामप्रतर्क्यां वह्निरूपांसर्गधारिणीं
णीं सर्वतःपादाःसर्वतःशिवां ४६३
निरंजनीनिर्विकारां शुद्धचैतन्यरूपिणीं कुलाकु

लसमुद्भूतामम्रृतानन्दसंचयां ४६४ सूर्यको
टिसमांशुभ्रां नादवीजतयास्थितां सर्वविनासन
करीं सर्वतेजोविभाविता ४६५ ईदृग्विधांगुह्यका
लीं निराकारांविभावयेत् सगुणाध्यानमधुना ब्रवी
मितवपार्वति ४६७ हृत्पद्मेष्ठलींदेयेते कन्दमूल

समुत्थिते द्वादशांगुलनालेस्मिं श्चतुरंगुलमुकुलिते
प्राणायामैर्विकशिते केशरान्वितकर्णिके ४६८ हृ
त्सरोरुहमध्येत्र प्रकृत्यात्मिककर्णिके अष्टैश्वर्यद
लोपेते विद्याकेशरमण्डिते ४६९ ज्ञाननालेमहाक
न्दे प्राणायामप्रबोधिते दशवक्त्रांगुह्यं कालीं त्रिगु

णात्मकविग्रहां ४७० जयंकरांजगद्योनिं ललज्जि
ह्वाकरालिनीं ग्रासयन्तीत्वकंदेहमापादतलमस्त
कं ४७१ भूतप्रेतपिशाचादिडाकिनीयोगिनीग
णैः भैरवीभिःपरिवृतां ज्वलत्पितृवनस्थितां ४७२
ज्वालाकरालबहलचितामध्यकृतस्थितिं शिवा

कारशिवाजूटां विमुक्तविकुरोच्चयां ४७३ निष्का
न्तरसनाविद्युत्प्रकम्पितजगत्त्रयां दन्तमण्डलनिर्ग
च्छज्वालाचन्द्रिकयातया ४७४ द्योतयन्तीजगत्सर्वं
वन्हिमण्डवत्सदा तुंगपीवरवक्षोजन्तरनम्रकले
वरां ४७५ प्रत्यालीढपदादेवी मृतकासनयानकां
परिवारैःसमीपस्थैरतीवविकरालिनी ४७६
मुण्डमालासंदोहकृतमालावगुण्ठितां सद्यः
छिन्नमुण्डाभ्यांकुण्डलद्वयशोभिनी ४७७ कठो
रपीवरानीलवर्तुलांबाहादोर्युतां नरास्त्रविहिता
वद्धयोगपट्टपरिष्कृतां ४७८ दिगम्बरांखर्वतनुः

हसन्तीकामलालसां सम्वर्त्तकालज्वलनदुर्निरी
क्ष्यतनुप्रभां ४७९ रत्नामालादिगोमायुपोता:
न्तार्चोर्ध्वविजृंती कल्पान्तघोरमार्तण्डकोटिसंता
नकारिणी ४८० निर्वातदीपमन्त्रस्मिन् दीपिता
हव्यवाहने नतत्तस्याशिखामध्ये तिष्ठन्तीं जगदम्बि ५६१
कां ४८१ विश्वार्चिःसंज्वलद्वह्निवमन्तीं विश्वतो
मुखीं वैश्वानरीं जगद्योनिं शिखानीलां महेश्वरी ४
८२ नीलतोयदकालाङ्गीं विद्युल्लेखेवभासुरां नी
वारशूकवत्तन्वी ४८३ ज्ञानमात्रैकगोचरां ध्यात्वै:
वं कालिकां देवीं सोहमस्मीति यामति: सगुणं वो

त्रमंस्येतज्ज्ञानं योगविदोविदुः तन्मयत्वंसमासा
द्यमुक्तिंतेनैवगच्छति ४०४ भ्रुवोर्मध्येतथात्मानं
ज्वलद्रूपिणमीश्वरं ध्यायन्नात्मानमत्रैव समाधिं
समवाप्नुयात् ४०५ आदित्यमण्डलेदेवीं हिरण्म
यतनुंशिवां ध्यायन्कैवल्यमाप्नोतिजन्ममृत्युपरि
॥

त्यजेत् ४०६ अष्टांगात्मकमेतद्धि पवित्रंपापना
शनं ध्यानंगुप्ततमंपुण्यं कीर्त्तितंतेसुरेश्वरि ४०७
ज्ञानेनैवसहैतेन नित्यकर्म्माणिकुर्व्वतः निवृत्ति
फलसंकल्पान्मुक्तिस्तस्यकरेस्थिता ४०८ इदंय
श्चपठेन्नित्यं योगाख्यानमनन्यधीः एकजन्मकृतंपा

पं सद्यस्तस्य विनश्यति ४८९ योगाख्यानमिदं पु
ण्यं ज्ञानाख्यानमदस्तथा सम्यग्विचारयेद्यस्तु स
हि सर्व्वज्ञतामियात् ४९० प्रवृत्तिस्थास्त्रियो नित्यमे
तज्ज्ञानसमन्विताः नित्यकर्म्माणि तान्दृष्ट्वा देवात्र
पि नमन्ति हि ४९१ तस्माद्योगेन सहितं नित्यकर्म्म

यथाविधि कर्त्तव्यं देहिना देवि मुक्तये न वर्जनीयतानाः
न केवलेन ज्ञानेन नापि योगेन लभ्यते ४९२ कैवल्यं
किन्तु युक्तेन सद्यो वै नित्यकर्म्मणा विज्ञायेत्थं परं त
त्त्वं कर्म्मयोगान्वितं चरेत् ४९३ कण्ठं नित्यागतदुर्द्ध
ब्रह्मरन्ध्रं तलावधि ततः पतन्नीपीयूषधारां सर्व्वक

लेवरं ४९४ आज्ञावधि तमीशानि नागाकृतिधरे
ऽनघे । ध्यायतोऽस्तु दक्षाणां नेतां जन्ममृत्युकृतेनृणां ४९५
प्रवेशयित्वा रसनां तदग्रेण हितेऽनघे । व्यावर्तितान
नैकुर्य्यात् ब्रान्तस्मिन्यातयन्सुधीः ४९६ सहस्रदल
राजीव गलत्पीयूषधारया तनीयस्योतिसितया ह्ला

वयेत्सकलान्तनुं ४९७ तेनाजरत्वमाप्नोति सिद्धीर
पि निजेच्छया उक्तानि यानि देहस्मिं श्चक्राणि सुरवन्दि
ते ४९८ गलादूर्द्ध्वं रसनया भेदयेत्तानि वैक्रमात्
तदाधोदशाग्निः प्राणे कुण्डलिन्यातथैवच ४९९
नानासिद्धीरवाप्नोति तत्तन्मण्डलभेदनैः तत्प्रकार

शनयोविधिं शृणुष्वावहिताशिवे ५०० सीवनीर
सनामूले यातिस्थितिवरानने तयानान्तःप्रविशति
जिह्वावद्धवस्तुभिः छिन्द्यादतीवशितया तिल
५०१
मात्रमतःसुधीः समाहितःसीवनीता मतिस्नुह्य
प्रवारया ५०२ पथ्यासैन्धवचूर्णाभ्यां मिश्रिता

भ्यांप्रघर्षयेत् सप्तमेसप्तमेरात्रे तावदेवविकृन्त
येत् ५०३ एवंदीर्घांनिवेज्ञिकृत्वा मध्यंवाशाद्दिनैः
प्रिये रसनायोहनकुर्या त्यातरेवदिनेदिने ५०४
ऊर्ध्वाधःपार्श्वयोश्चापि चर्द्धीयवसदेवहि मएला
लाङ्गलनालभ्रीजवदपितनीयसी ५०५ श्वासनं

पूर्ववत्कृता नाडीरपि विशोध्य च स्थित्वा निःशब्द
एकान्ते जिह्वामूर्द्ध्वं नयेत्सुधीः ५०६ तत्रादौ लल
नाचक्रे द्वादशाङ्गुलमिते प्रवेश्य रसनां तिष्ठेद्या
मद्वयमनन्यधीः ५०७ एवं वर्षत्रयं तत्र कुर्याद
भ्यासमीश्वरि एवमभ्यस्यतस्तस्य दिवारात्रिमपि

प्रिये ५०८ गलन्ति तस्य वक्रस्य जुष्टयः पक्वतां ग
ताः तन्नस्फलोपजनिते द्वेषि नासौ विलियते ५०९
सिद्धयो याश्च जायन्ते तानि बोधस्तु रेश्वरि नक्षुत्पि
पासा न स्वेदो न जृंभा नापि चक्षुतं ५१० पुंसीमच्छूत्रे
न स्यातां न शिरःपलिताश्यपि निद्रातन्द्राशोकमोहः

कामक्रोधमदात्तथा ॥११ ललनाभेदितंदेवि नः
स्पृशन्निकरावत यावन्नःसुसत्त्वोदीप्ता तेषु कोपि
नजायते ॥१२ सरस्वतीतत्पुरवे स्वयमेववसेत्स
दा त्रिकोणयनानन्तरं हि क्रुवोर्मध्येपरिस्थितं ॥१३
आज्ञांसिन्ध्यांकृन्तैर्देवि दलत्रयविराजितं तत्रैवर

सनायोगमभ्यसेद्वत्सरत्रयं ॥१४ त्रिगुणाविर्ना
वद्रूपफलान्यस्मिंस्तुयानि हि लब्धापरिणातिता
निपतन्निविभ्रयैःसह ॥१५ नरस्तावोपयात्यस्य
देवत्वमुपतिष्ठते जायते दूरदर्शित्वं दूरश्रोतृत्वमे
वच ॥१६ कलेवरस्यसौगन्ध्यं हृषीकवशितातः

ध्या आहारस्यांपरित्यागादपिप्राणस्यधारणा ५१७
अन्तर्ज्योतिःप्रकाशश्चविद्यानांस्फूर्त्तिरेवच वाक्यसं
विघ्नरहितत्वंपुण्यपापांप्ररोहणं ५१८ आज्ञायां
रसनायोगादेताःस्युःसिद्धयोसदा तस्योर्द्ध्वंतुसतं
अक्षंललाटेपरितिष्ठति ५१९ निवेशयेत्तत्रजिह्वां

दलपद्मविराजिते तत्राभ्यासतोवर्षत्रयेगुणाजग
दीश्वरि ५२० फलानिविगलन्त्यस्यतद्गुणामिवपा
कतः तेनास्यखगतिर्भूयात्पतगानामिवाम्बरे ५२१
पाषाणवदशेषत्वंतनोरस्यजायते आपोमेनंन
ज्जयन्ति पावकोनदहत्यपि ५२२ नैनंछिन्दन्तिशस्त्राः

णि विषं नाक्रमते तनौ जायते कामद्रूपित्वं सर्व्वाणि
भवितातथा ५२३ शापानुग्रहसामर्थ्यं सर्व्वज्ञत्वं
तथैवच एवं त्रिवर्षमभ्यस्य तद्वृद्ध्या सोमनामनि ५२४
महाचक्रे सिद्धिहेतौ षोडशच्छेदभूषिते रसनाग्रं स
निवेश्य निराकारं विचिन्तयेत् ५२५ अभ्यसन्नीह

शं पंचवर्षं सोमविभेदनं अनेनैव शरीरेण देवर
वप्रजायते ५२६ अकायोऽनिमिषो भूत्वा महा
वलपराक्रमः भूत्वागच्छति पातालं देवानामपिम
न्दिरं ५२७ तैः सहात्तकथ्यां चक्रि भुंक्ते होतेव्रज
त्यपि अणिमाद्यष्टसिद्धीस्स्फटित्येव प्रसाधयेत्

५२८ जायतेचास्यवाक्सिद्धि स्त्रिलोकीवशगाभ
वेत् ५२९ अपोवह्निस्त्रविशति वायुमाकाशमेव
च एवमभ्यस्यतस्तैव स्थित्वासन्नैवह्रायनात् सहस्र
दलसंज्ञेदे मनः सम्यक्निवेशयेत् इडायाः पिंगलाया
श्च धारांसोधीपिबन्मुखं ५३० तेनीयोन्योपिजिह्वा

ग्रैस्तनीयःप्रविवर्जयेत् पराङ्मुखीकृत्यतेद्वे वद
नजगदीश्वरि ५३१ धारांतांपातयेदंगे रसनाग्रेण
संलिहन् तेनामरत्वमाप्नोति शिवएवनवेदपि
५३२ परार्द्धजीवीभवति प्रजापतिरिवापरः दे
वानाकर्षयेच्चापि सयक्षासुरपन्नगान् ५३३ वर्णि

त्तुं शक्यते नास्य महिमा वर्षकोटिभिः रुद्र एव भवे
त्साक्षात् त्यां वशीनिकदेहभृत् ५३४ अप्यणिर्विशो
षयितुं समर्थो निमिषेण सः वमन्तुख्यैनकाला
पि जगद्दग्धुमपि क्षमः ५३५ द्वादशाब्दं समभ्यस्य
न्कैवल्यमपि साधयेत् मोक्षैकसाधनस्यास्य विधे

५३६

रन्यास्तु सिद्धयः केवलं विघ्नकारिण्य इत्येतद्विद्धि
पार्वति हठात्तु केवलं सिद्धी रनिकांक्षति सर्वदा
५३७ मोक्षार्थमेव यतते धीरः संसारसागरे दैनन्दि
नेष्टुरेशानि प्रलये समुपस्थिते ५३८ दह्यमाने त्रि
जगति वह्निरेव भवत्यसौ नष्टेऽग्नौ ध्रुवपर्यन्तं ज

लउच्छलितेसति ५३९ ततोयन्विग्रहोर्भूत्वा तत्रै
वविशतिध्रुवं महाभूतेषुनष्टेषु वतुर्व्वपिसमन्त
तः ५४० संभूयाकाशरूपोयं खयत्रप्रविलीयः
ते कल्यादौपुनरस्यैव समारंभेसमुच्छ्रति ५४१ यदी
च्छतिपुनर्देहं पूर्व्वरूपोभिजायते नोचेन्निर्व्वाणमा

त्रोतिपुनराद्यन्तिवर्जितं ५४२ इसनायंयसातत्र
यत्नेरेनहृदाभिते निर्गुणंसगुणाकारं पूनंध्यानंस
माचरेत् ५४३ इदमग्रेसदैवासी हृतिजन्मेकका
णं कारणादनवद्वीजंवतुर्हर्णात्मकंस्फुरत् ५४४
तदेतदोमितिव्रह्म व्रह्मज्ञानैकसाधनं येनपश्यन्ति

विद्वांसः सर्वतः परमाप्नुतं तदेतद्ब्रह्मणवनेष्वणवेय
वेत्त्वरयः ५४५ सम्यक्शोत्रिविधियानित्यं तत्रैव क्षा
मिसंस्थए संहारसंज्ञकस्यास्य वांजनंत्वर्द्धमात्रकं
५४६ वालसूर्यप्रतीकाशं भक्तिविन्दुमदक्षरं
यदस्योङ्कारनिष्ठस्य मात्रांशो व्याप्तचेतनः ५४७

ङ्कादितीचमकारान्ते विन्दुरूपं प्रदृश्यते विद्वोस्तप
हिनादश्च शुद्धस्फटिकसन्निभ ५४८ विशुद्धचेत
सः शक्तिः प्रकाशयतिचेतसि तस्मिन्नित्याधिको रुद्रो
महर्षि ५४९ कलापिंगलः ५४९ उर्द्ध्वरेताविरूपा
क्षान्तिस्तीत्याङ्कुरागमाः आगमैकान्तसंवेद्यो रुद्रएको

नवापर ५५० तमागमज्ञानमात्रमप्रतंकूलपिं
लं तत्रत्वामिक्तुतोदेविद्दष्टिरोंकारएवहि ५५१ ॐ
कारोवाचकस्तस्य वाच्योरुद्रोनवापरः इतिवेदाव
सानज्ञः स्वयम्भूः प्राहसर्व्ववित् ५५२ सांख्यादिष्वपि
विद्वांसः सदाप्रणवसंस्थिताः नादेयहिमहादेवं पश्य
न्तिज्ञानचक्षुषा ५५३ तथामहर्षयः सर्व्वे विष्णुब्रह्मप्र
णवाक्षरैः । मारीचिरत्र्यांगिरसौ पुलस्त्यः पुलहः क्रतु
: ५५४ भृगुर्व्वशिष्ठस्सम्वर्त्तोजैगीषव्योघगौतमः का
त्यायनोनाचिकेताविश्वामित्रपराशरौ ५५५ उपमन्यु
र्भरद्वाजः कपिलोदेवलोसितः मार्कण्डेयकठात्रेयह

रीतशुकशौनकाः ॥५६॥ एते चान्ये च मुनयो ब्रह्मनि
ष्ठास्तपोधनाः विमुक्तयोगनिरता त्यक्तसंसारबा
न्धनाः ॥५७॥ मौनिनो जटिलाः शान्ता रागद्वेषवि
वर्जिताः जितकामक्रोधलोभा निर्ममा निर्भयाः स्मृता
॥५८॥ निःसंगा निरहंकारा दान्ता वीतमदूर्मयः

चेतसा संप्रपश्यन्ति नादान्तेह्यमनध्वजं ॥५९॥ सं
सारपाशबद्धानां योगिनामप्ययोगिनां नैवानाद
ल्लिन्नैप्रज्ञमन्त्रेणाह्यमनध्वजं ॥६०॥ तमागमेष्वसंदि
ग्धं महत्तत्त्वापिंगलं ॐकारस्तुपिणारुद्रं चिन्तयः
सुलेवं जयेत् ॥६१॥ तस्यात्मनि महादेवः प्रकाशय

निस्त्रातिं नैष्कलः परमात्माख्यो योगिनां हृदि संस्थि
तः ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् नि
र्म्मलो भगवान् रुद्रः रुद्रकोटीभिरावृत ५६३ ओंका
रं गृह्य माश्रित्य सन्निधौ तिष्ठतीति च कृतमन्त्रन्यास
तनुः सितभस्मावगुण्ठितः ५६४ जिह्वाग्रहिका

र्य्याणि स्वेत्वे संकृष्य कारणे शंभोः पदे च परमे च तु
र्निग्रुसमन्विते ५६५ चित्तं निधाय योगेव देहस्मिन्
स्थाणुः पुरे गुहायां निचितं तद्रु परमानन्दविग्रहं
कोटिचन्द्रसमच्छायं कोटिसूर्य्यसमप्रभं ५६६ गुः
ह्यप्रविष्टमद्भुत मोंकारेण जपेत्सदा सकल्यात्मपति

न

क्रमाद्दीर्घायुर्बलविद्भवेत् ५६७ प्राणं व्याहर

ध्यात्वा यस्त्यजेत्कायमात्मनः ब्रह्मैवासौ भूत्वं तस्य का

लो मृत्युर्विनश्यति ५६८ एवमेव जयोपायः काल

स्य खरवञ्चिते हृत्पद्मेऽष्टदलोपेते कन्दमध्यात्समुत्थि

ते ५६९ द्वादशाङ्गुलनालेस्मिं चतुरङ्गुलमुत्थिते

प्राणायामैर्विकशिते केशराञ्चितकर्णिके ५७० सु

धारसं विन्दुवह्निः शशिरश्मिनिराहते अतंसत्परः

ब्रह्मपुरमकमलपिंगलं ५७१ उद्धरेत विश्वपाक्षं वि

श्वरूपं सदाशिवं पंचवक्त्रं दशभुजं नीलकण्ठं त्रिलो

चनं ५७२ शुद्धस्फटिकसंकाशं सर्वभूतहृदिस्थितं

षोडशाब्दसंयुक्ता किरण्याब्यायधोमुखात् ५७३ नि
र्गतामृतधाराणां सहस्रैश्चसमाप्लुतं प्लावितंभुतत्र
त्रैव विन्नयन्तु महामति मृत्युजयिन्या गुह्याया स्वा
त्मकं तथैव च ५७४ मंत्रं गृणन्नविरतं ध्यायेन्नि
श्चलमानसः यजेद्वानित्यकर्म्माणि कुर्वन्नैमित्तिका
नि च ५७५ मृतसंजीविनं देवि तद्रमेवात्मनिस्मरे
त् यस्तुसर्वात्मकं रुद्रं परमानन्दविग्रहं त्रैयम्बके
णवारुद्रं ध्यायरर्द्धयतेत्वहं तस्यविघ्नाधिकोरुद्रो
महर्षिः कृष्णपिंगलः ५७७ ऊर्द्धरेताविरूपाक्षोवि
श्वरूपायनिवेतसि मृत्युंजीतोरुजायत्तः सर्व्वावस्थासु

सर्व्वदा ५७८ सर्व्वापत्सु च सर्व्वत्र मृतसंजीविनीजये
नू संसारपाशबद्धानां योगिनां मोक्षकांक्षिणां ५७९
नान्यत्वत्सौमित्ये क्यं मृतोद्धैयम्बकादृते । एवं ते
मृत्युविजयोपायउक्तः सुरेश्वरि ५८० उपायं मृत्यु
विजये ऽनवरं नं ब्रवीमिते सामरस्यसमापन्ने शिव

शक्तीविविवर्जयेत् ५८१ सहस्रदलराजीवकृता
सनपरिग्रहे अभेदत्वसमापन्ने द्वितभावविवर्जि
ते ५८२ शून्यावस्थाकृतिधरे नादबिन्दुज्वलन्नु
वाच्यवाचकताद्रूपे प्रतीत्यन्तरवर्जिते ५८३ तु
रीयरूपसंभिन्न तुरीयातीतविग्रहे निष्प्रपंचेति

शकारे एकीभावमुपागते ५८४ सत्तामात्रपरिस्प
न्दे चैतन्याभासवर्जिते निरंजने निराकारे निरीहे च वि
हीने ५८५ ध्यायन्नेवं शिवं शक्तिं ब्रह्मरन्ध्राम्बुजा
न्तरे वंचयित्वात्मकं कालं जीवेद्देशं सवत्सरं ५८६
तेषु तेषु च भावेषु तत्तद्रूपेण संविशन् इत्थं तरति

देवेशि जन्मतन्त्ररणादपि ५८७ देव्युवाच कि
यता कालचक्रेण शैवः सम्पत्तरो भवेत् तन्मे कथय
भूतेश विस्तरेणादयानिधे ५८८ श्रीमहाकाल उ
वाच सूक्ष्मं कालं समाहृत्य यावदेशो हि वत्सरः
पूर्णो भवति कल्याणि विस्तरात्तावदीरये ५८९ प

रमाहुंसमतोत्ति यावताइनेह्लसाहविः तंकालंक
र्पहीनाम्ना प्रवदन्निमतोमिषिणाः ५२१ तावताका
ललेशेन ग्रहाणामन्यराशिषु संक्रमोजायतेदेवि
सर्व्वेषाम्पिनिशाशितः दशभिःकर्परीभिस्तु विकरे
कोभिजायते निमेषःकथितस्त्रिंशत्रुटयैजगदीश्व

रि ५२२ काष्ठातथाष्टदशभिर्निमिषैःपरिकीर्त्यते
त्रिंशद्भिश्चकाष्ठाभिःकलैकाप्रोच्यतेबुधैः ५२३
तथाकलाभिस्त्रिंशद्भिःक्षणएकोभिजायते षड्भि
:क्षणैर्भवेन्नाडी घुङ्कान्तेत्तद्वयेनच ५२४ त्रिंशन्मु
हूर्त्तैर्दिवसरजन्येकाभिजायते मासएकोनवेद्देवि

त्रिंशद्भिर्दिनरात्रिभिः ५२५ तस्यार्द्धेन भवेत्कृष्णः प
क्षः कृष्णस्तथेतरः शुक्लः पक्षः स विज्ञेयो यत्रासौ व
र्द्धते शशी ५२६ यत्र संक्रमते नित्यं स कृष्णः पक्ष उ
च्यते मासेनैकेन मर्त्यानां पितॄणामेकवासरं ५२७
शुक्लः पक्षो निशा तेषां कृष्णो दिवस उच्यते कुर्यात्क्रि

यमतो दर्शे पितॄणां तृप्तिहेतवे ५२८ मासाभ्यां स्या
दृतुस्ताभ्यां ते षड्वत्सरे हि मार्गादिभिर्द्वादशभिर्मा
सैः षडृतवः क्रमात् हेमन्तः शिशिरश्चैव वसन्तो ग्रीष्म
एव च वर्षा शरच्चायनं स्यादेतैरपि त्रिभिस्त्रिभिः ६००
शिशिराद्यैस्त्रिभिस्तद्वद्वर्षाद्यैर्दक्षिणायनं अयनाभ्यां

तथाह्वास्यां मनुष्योद्दोपिजायते ६०१ एकंदिनंस
देवानांसूर्य्यासहितंप्रिये उत्तरस्यांदिशि रविर्गछ
तीसुन्नरायनं ६०२ दक्षिणास्यांतथैवैतिजवेन्नदक्षि
णायनं वासरंकथितंदेवि देवानास्तुनरायणं ६०३
शयनायतथातेषां रजनीदक्षिणायनं जाग्रन्तुसर्व्वः

देवेषु धर्म्मकार्य्याण्यतंप्रिये ६०४ कर्तव्यानिद्वि
जैरन्यान्यपिवेदोदितानिच एवंत्रिंशद्दिनैःसौरैरेको
मासोपिजायते ६०५ तादृग्द्वादशभिर्मासैर्देवाना
मेकहायनं एतादृशानामब्दानांत्रैदशानांवरानने
६०६ चत्वार्य्येवसहस्राणि धीराःसत्ययुगंविदुः

यथादिनस्यभवतःपूर्वासन्ध्याचपश्चिमा ६०७ एवं
युगस्यापिदेवि द्वेसन्ध्येभवतःसदा चतुःशतीपूर्व
सन्ध्यापश्चिमाचचतुःशती ६०८ वर्षाणांदेवमाने
नविज्ञेयाजगदीश्वरि लक्षाणिसप्तदशैवनववत्स
रमानतः ६०९ अष्टाविंशतिसाहस्रि तथान्यश्चः

तमुच्यते एतस्यैवचतुर्थांश हीनाश्चेतानिधीयते
६१० कृतार्द्धं द्वापरंज्ञेयं तत्तुर्यांशःकलिर्मतः यु
गेष्वतुनिर्द्दिष्टाना मद्दसंख्यांनिबोधमे ६११ नवेद्वा
दशसाहस्री मर्त्यमानंनिबोधमे नियुतानीवहेकाला
रि लक्षाणित्रीणिचैवहि ६१२ तथाविंशतिसाहस्री

संख्येयं परिछिन्नतामता दिव्यं युगं देवि नवैकमीदृ
क्चतुर्युगे ॥१३॥ एकसप्ततिभिर्दिव्ययुगैर्मन्वन्तरं म
तं मन्वन्तरीयदेवानां नक्ताद्दिवावधारय ॥१४॥ अ
ष्टौ लक्षाणि पञ्चैवायुतानि तदनंतरं ॥ द्वे सहस्रे त-
थान्ये च मर्त्यसंख्यामतः शृणु ॥१५॥ त्रिंशत्कोट्यः स

सषष्ठि लक्षाणि परमेश्वरि तथा द्वे अयुते चैव व
र्षाणां परिकथ्यते ॥१६॥ चतुर्दशैव मनवस्तु ब्रह्मणो दि
वसे प्रिये यथा युगानां सन्ध्ये द्वे भवतः पूर्वपश्चिमे
॥१७॥ मन्वन्तराणां न तथा पश्चिमा देवि कथ्यते पू
र्वैव सन्ध्या विज्ञेया साकृताद्रुप्रमाणिका ॥१८॥ सा

कमण्डलपर्य्यन्तं जलपूर्णान्निजायते सर्व्वाश्चस्याम
नोर्देवि ब्राह्मंमेसत्यसम्मितः ६१८ वर्षप्रमाणेनवत्से
वतेनपंचदशस्मृतः सर्गादौकुर्व्वतःसृष्टिं ब्रह्मणो
दैवमानतः ६२० अयुतान्येवचत्वारि सहस्राण्येव
सप्तच शतानिचत्वारितथा व्यातियन्त्येवमेवहि ६२१

नाहंमानमथैतस्य गदतोमेनिशामय एकाकोटिस्त
थासप्त नियुतानिमहेश्वरि ६२२ चतुःषष्टिसहस्रा
णि पिण्डिताकालवह्निहि शेषंसंहरतोविश्वं सकृत्स्य
सचराचरं ६२३ दैनन्दिनीयकल्पान्ते तस्यसंहा
रस्वपिणः एतावानेवकालोहि व्यतिक्रामतिपार्व्व

ति ६२४ एतावद्दिवसंकल्प रात्रिरेतावतीतथा
शीत्यानयानयैतस्य मासस्त्रिंशद्दिनैर्भवेत् ६२५
मासैर्द्वादशभिर्वर्षं स्तन्नद्वीत्येवजायते समायं
वाशतत्तस्य परार्द्धाभिधयेरिता ६२६ द्वितीया
द्विपरार्द्धाख्या तस्यैवंब्रह्मणः पुनः परमायुर्वर्ष

शतं ततःसोपिविपद्यते ६२७ पुनरन्योभवेद्ब्रह्मा
सोपितावदनेसह स्थित्वापुनर्विपन्नःस्याःदेवंब्र
ह्मपरम्परा ६२८ अनादाविहसंसारे जायतेपर:
मेश्वरि शिवस्यदिनएकस्मिन्नंचब्रह्माणईदृशाः
६२९ उपद्यप्रविलीयन्ते सत्यंसत्यंवदाम्यहं रुद्र

स्ववासरं यावन्नावत्येवविनावरी ६३० उपयन्तेर
ह्ः क्षपयो र्द्दशंत्र्वलाएाईश्वरि एवंविंशोत्तरशतेर
होमिर्मासईष्यते ६३१ अष्टचत्वारिंशमासे रेकोव
र्षोऽभिजायते स्वाब्दद्वादसाहस्त्रि शिवस्याथिति
रुच्यते ६३२ ततःसलीयतेतस्य शंकावेवतुरेश्व

रि अन्तर्धायततुंत्वाला सन्नामात्रेववतिष्ठते ६३३
संहारकर्त्तुरुद्रस्य पादपद्मावलंविनी याकरोटिः
मयीमालातामेनिगदतःशृएउ ६३४ एकंसहस्त्रं
मुएडाना मशीत्यासहितंप्रिये केषांकेषामितिप्रः
अप्रत्युत्तरमिदंशृएउ ६३५ अशीतिश्चशतंविष्णो

त्विसीतं मञ्जिघुघ्रिवि धेः पुरन्दरस्य विंशत्यासहितं
शतमेवहि ६३६ अश्विनुपत्योः प्रत्येकं शतं त्रि
दशवह्निते प्रत्येकं वतथा त्रिंशत् कालमृत्योरपि
स्फुटं ६३७ यमस्य विंशतिर्वह्नेर्दशवायोश्चल
ष्वतिः कामस्य विंशतिं प्रोक्ता तथाष्टौ निऋतेरपि

६३८ पंचपंचकपालानि प्रत्येकं चन्द्रसूर्ययोः
वासुकानन्तयोर्द्वे द्वे हयग्रीवशिरस्त्रयं ६३९ कू
र्मत्रिविक्रमक्रोड मीनकेशरिणां त्रयं प्रत्येकं वर्त
ते तस्यां मालायां जमदग्नेर्हि ६४० अन्येषां केवग
णा. भूतानामिह संस्थितौ कालेन विध्यते वेधा श्वचु

तोपिच्युतोनवेत् ६४१ तद्रोपिद्रवतांयाति काक
ध्यान्येषुजन्तुषु इतिकथितंशैवं प्रमाणंमासवर्ष
योः ६४२ अनेनैवप्रमाणेन तादृग्ध्यानपरोनरः
तद्रूपेणसंविश्य जीवेदब्दंससौकरं ६४३ दुष्करं
योगसंवित्ति दुष्करंमृत्युनाशनं दुष्करंशिवशक्त्यो

अन्तकिरव्याप्तिवाहिनी ६४४ इतिसर्व्वमशेषेणाक
थितंतवपार्व्वति शरीरोत्पत्तिसंस्थानं नाडीनामपिवृ
दिशः ६४५ क्रमयोगोहठयोगः प्राणायामविधि
स्तथा आसनानांचसर्व्वेषां विधानमुपवर्णितं ६४६
त्रैकालिकज्ञानशाली त्रिपुरघ्नोगजोत्पत्तिः चतुर्युगा

वारकेत्ता सर्व्वान्तर्याम्यधीश्वरः ६४७ ज्ञात्वाहार्द्द
मभिप्रायं लोकानां विस्मयेषिणां न्यासपूजाजपव
लि प्रवृत्तीं तुक्रवान्सुरः ६४८ कामकेलिः सहस्त्री
निर्यत्रमांसमुराद्यशनं श्रावारस्यावसंकोचः स्वेच्छा
चारित्वमेवच ६४९ प्रशेवनतया सर्व्वे वर्न्निष्यन्ती

दशेऽप्यवनि दुष्करत्वादसाध्यत्वा द्योगं तदत्तु वैजगोः
६५० वेर्त्मद्वयं भगवता दर्शितं करुणावशात् य
स्येच्छावर्त्ततेयत्र सतत्र रमतां सुखं ६५१ योगस्थि
तः सत्ययुगे त्रेतायां ध्यानमेवच द्वापरे र्व्वाजपन्या
सा मद्यमांसाशनं कलौ ६५२ कदाचिन्नाग्ययोगे

नलभ्यतेतादृशोगुरुः एतान्विहायापितदायो॰

गमेवसमभ्यसेत् ६५३ अतएवमयाप्रोक्तंमयो

गज्ञःसुप्तेनिशि योगज्ञस्तुसमुत्थायनिशीथेयो

गमभ्यसेत् ६५४ पूजान्यासान्वितंयोगंयेकुर्व्वुः

शक्नुवन्निहि मनुष्यचर्म्मणानद्धास्तेतज्ञानात्रसं

शयः ६५५ इतिश्रीमहाकालसंहितायांशारी

रयोगकथनंनामैकादशतमःपटलः श्री

महामायाप्रीतिरस्तु नृपखेटमितेव

त्सरे पितृनाथमासतिथौविधोर्दिनेस्मिन् विशदे

नत्रसोहिपक्षकेलिखितंश्रीगुरुपाद्दत्ताविनावे

लिखितदैवज्ञलक्ष्मीनारायणः शुभमस्तु ॥ ॥
अथवचनसमूहाः लिख्यते ॥ ॥सनत्कुमारसंहितायाम् ॥
अकृत्वामानसंयागंनकुर्यात्बहिरर्चनम् ॥ ॥इतिवचनात्
अन्तर्यागविधिस्तुबृहदुत्तरतंत्रे ॥हृत्पद्मकर्णिकामध्येयो
गपीठोपरिस्थितां ॥ध्यात्वातंगन्धपुष्पाद्यैर्मानसैरुपचारकैः ॥

संपूज्याशिविवत्पश्चात्मानसंहोममाचरेत् ॥ इतिवचनात् ॥
॥ ॥मानसोपचारस्तुश्यामारहस्ये ॥अमायामनहंकारमरा
गममदंतथा ॥अमोहकमदंभंचअद्वेषाक्षोभकौतथा ॥
अमात्सर्यमलोभंचदशपुष्पंविदुर्बुधाः ॥ ॥अहिंसा
परमंपुष्पंपुष्पमिन्द्रियनिग्रहं ॥दयापुष्पंधर्मपुष्पंज्ञा

नपुष्पंचपंचमं इत्युक्तै रत्नमैःपुष्पैः पूजयेत्परदेवताम्॥ ॥
उपचारपूजानवरत्नेश्वरे॥ ॥गन्धपुष्पंतथाधूपंनैवेद्यंदी
पमेवच॥एतेपञ्चोपचारैश्चकैवल्यफलदायिनः॥ ५॥
नत्रैव॥ ॥पाद्यार्घ्यंतथास्नानंमधुपर्काचमनंतथा॥गन्धा
द्योनिवेद्यान्ताउपचारदशक्रमात्॥ ॥महाकालसंहितायांच॥

पाद्यार्घ्याचमनीयंस्नानीयंचतथार्घ्यतुक्रमात्॥गन्धपुष्पंचधूप
चदीपंनैवेद्यमेवच॥पुनराचमनीयंचदशैतान्संप्रचक्षते॥
॥ ॥कुलरत्नावल्याम्॥ ॥पाद्यार्घ्याचमनस्नानंपुनराच
मनीयकं॥गन्धाक्षतप्रसूनानिधूपदीपनिवेद्यकम्॥ताम्बू
लंद्वादशप्रोक्ताउपचाराःप्रपूजने॥ ॥नवरत्नेश्वरेच॥

आसनंस्वागतंपाद्यमर्घ्यमाँनमनीयकम्॥मधुपर्काचम
नस्नानंवसनाभरणानिच॥सुगन्धसुमनोधूपदीपनैवेद्य
वन्दनम्॥प्रयोजयेदर्च्चनायामुपचारास्तुषोडश॥४॥ ॥
शारदायान्तु॥ ॥पाद्यार्घ्याचमनस्नानंवसनाभरणानिच॥
गंधपुष्पेधूपदीपौनैवेद्याचमनन्तथा॥ताम्बूलमर्च्चनास्तोत्रं

तर्पणंचनमस्क्रिया॥प्रयोजयेदर्च्चनायामुपचारांस्तुषोडशः॥
॥ ॥सिद्धान्तसारेसारदायांच॥ ॥पाद्ये॥नमः॥योज्या॥स्था
न॥पादे॥अर्घ्ये॥स्वाहा॥योज्या॥स्थान॥मूर्ध्नि॥॥आचमनीये॥
स्वधा॥स्थान॥मुखे॥मधुपर्के॥स्वधा॥योज्या॥स्थान॥मुखे॥
द्विजेनतु॥मधुपर्के॥आचमनीये॥वं॥इतिवीजेनकार्य्यं॥

॥क्षीर॥ मधु॥ दधि॥ शर्करा॥ घृत॥ २

॥तन्त्रसारे॥ ॥नमस्स्वाहास्वधावौषट्॥ इत्यस्यत्यागार्थः कृतः॥
॥ ॥गन्धोदकसमर्पणे॥ मूलमन्त्रः॥ पुष्पे॥ वौषट्॥ स्नाने॥ नमः॥
नैवेद्ये॥ नमःस्वाहा॥ पंचामृते॥ मूलमंत्रः॥ ॥नवरत्नेश्वरे च॥
॥ ॥आसनं स्वागतं पाद्यं चार्घ्यमाचमनीयकं॥ स्नानं वासो
पवीतं च भूषणानि च सर्वशः॥ गन्धं पुष्पं तथा धूपं दीपमन्नं च
दर्पणम्॥ माल्यानुलेपनं चैव नमस्कारं विसर्जनम्॥ आष्टा
दशोपचारैस्तु मन्त्री पूजां समाचरेत्॥ ॥सुन्दरीरहस्यवृत्तौ॥
॥ ॥आसनाभ्यञ्जनेतद्वदुद्वर्तननिरूक्षणे॥ संमाने सर्पि
रादेः स्नस्नपनावाहनेततः॥ पाद्यार्घाचमनीयेच स्नापनीम
धुपर्ककौ॥ पुनराचमनीयं च वस्त्रयज्ञोपवीतके॥ अलंका

रागन्धपुष्पेधूपदीपौ तथैव च॥ तांबूलानि च नैवेद्यं पुष्पमाला
तथैव चं॥ अनुलेपनशय्ये च वर्ष्मव्यजनं तथा॥ आदर्शदर्श
नं चैव नमस्कारो प्यनन्तरं॥ गीतवाद्यवितानानि स्तुतिर्होमः
प्रदक्षिणम्॥ दन्तकाष्ठप्रदानञ्च ततो देवविसर्ज्जनम्॥
उपचार इमे ज्ञेया षट्त्रिंशत्सुरपूजिते॥ ॥सनत्कुमारसंहिता

यां॥ मानसं होममाचरेदिति वचनात्॥ ॥होमविधिः मेरुतन्त्रे॥
मूलाधारे चतुष्कोणमग्निकुण्डं विचिन्तयेत्॥ तत्राग्निकुण्डे कु
ण्डलीरूपं ध्यायेत्॥ ॥मूलमन्त्रमुच्चरेत्॥ ॥धर्म्माधर्महवि
र्दिप्ते आत्माग्नौ मनसा स्रुचं॥ सुषुम्नावर्त्मना नित्यमक्षवृ
त्तिं जुहोम्यहम्॥१॥ पुनर्मूलं पुनः श्लोकं पुनः पूर्णां जुहोमि च॥

॥ ॥पुण्यवृत्तिं जुहोम्यहं॥ ॥पापवृत्तिं जु०॥ ॥कृत्यवृत्ति
॥अकृत्य॥ ॥संकल्प०॥ ॥अधर्म०॥ ॥कृत्वा पृथक्स्वा
हान्तं पुनःश्लोकमिमं पठेत्॥ ॥मूलमन्त्र॥ ॥प्रकाशाकाशहस्ता
भ्यामवलंब्योन्मनिस्रुवं॥धर्माधर्मकलास्नेहं पूर्णवह्नौ जुहो
म्यहं॥स्वाहान्तेनाहुतिं दत्वा प्राणायामनिरोधतः॥निरस्त
वीरचूडामणौ॥इदं पवित्रममृतं पीयतां भवभेषजं॥पशुपाशस

निरुपाधिं तमात्मानं चिन्तयन् संस्मरेत्॥ ॥श्यामारहस्या
दौ तु॥ ॥नाभिचैतन्यरूपाग्नौ हविषा मनसा स्रुवं॥ज्ञानप्र
दीपिते नित्यमक्षवृत्तिं जुहोम्यहम्॥ ॥स्वाहेति प्रथमाहुतिः
मूलान्तं॥ ॥धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुवं॥
सुषुम्नावर्त्मना नित्यमक्षवृत्तिं जुहोम्यहम्॥ ॥स्वाहेति द्वि

तीयाहुतिः॥ ॥मूलान्ते॥ ॥प्रकाशाकाशहस्ताभ्यामव
लंबोमनीस्रुचं॥धर्म्माधर्म्मकलास्नेहपूर्णवह्नौजुहोम्य
हम्॥ ॥स्वाहेतितृतीयाहुतिः॥ ॥मूलान्ते॥ ॥अन्तर्निर
न्तरनिरिन्धनमेधमानेमोहान्धकारपरिपन्थिनिसंवि
दग्नौ॥कस्मिंश्चिदद्भुतमरीचिविकाशभूमौविश्वंजुहो

मिवसुधादिशिवावसानम्॥ ॥इतिचतुश्श्लोकेनचतुराहुतिः॥
मरुतन्त्रे॥ ॥इडयावायुमाकृष्यगुदंकिंचिदाकुंच्यजिह्वार
श्री
तालुगतांविधारात्कुण्डलिनीमुत्थाप्यसहस्रदलकमल
कर्णिकान्तर्गतपरमशिवेनसहतांसंयोज्यप्राक्तपीठदे
वतामर्च्चयेदितिशिवेषडुक्तः॥ ॥तथाच॥ ॥वामना

डीसमाकृष्य किञ्चिदाकुञ्चयेत् गुदं ॥ रेचयेत् सूर्यमा
र्गेन जिह्वां तालुगतां चरेत् ॥ शक्तिं शिवपदे योज्य किञ्चिद
कुञ्चयेदधः ॥ कृत्वैवन्तु पजेत् पीठन्यासमार्गेन मन्त्रवित् ॥
तस्मिन्पीठे स्थितामिष्ट देवतां मूर्त्तिविग्रहां ॥ ध्यात्वा यजे
चन्दनाद्यैर्मानसं भोजनान्तकम् ॥ भोजनावसरे त्वन्तः वै

श्वदेवं समाचरेत् ॥ ॥ नित्यबलिः पृथिव्यादि ॥ दश ॥
तत्रैव ॥ ॥ तदन्ते तन्मयो भूत्वा जपेदष्टोत्तरं शतं ॥ मूलं तत्स
र्वसंपत्यै देवतायै निवेदयेत् ॥ ॥ मातृकार्णवे ॥ ॥ मालापं
चाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकं ॥ ग्रन्थिः कुण्डलिनी
प्रोक्ता कलान्ते मेरुसंस्थितिः ॥ ॥ कुमारीकल्पे तु ॥ ॥

॥चण्डिकायां फलमुक्तः॥२

होमात्सर्वं जपउक्तः॥ततो वै मानसं जाप्यं कुर्याद्धोमादिमेव च॥
नमस्कृत्य तथा स्तुत्वा वहिर्यागमथाचरेत्॥ ॥इति मानसिकं॥
ॐ॥ ॥इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्मसमो भवेत्॥न तस्य पापपुण्यानि जीवन्मुक्तो भवेद्ध्रुवं४॥ ॥कुमारीकल्पे॥ ॥वहिर्यागमथाचरेदिति वचनात्॥ ॥वहिर्यागस्तु॥यामले॥ ॥

ऋष्यादिसहितामेतां लिखित्वा भूमिमध्यगां॥ऋष्यादिनासमभ्यर्च्य शिष्यायाथ प्रदर्शयेत्॥यदि शिष्ये महाप्रीतिस्तदा कर्णे वदेद्गुरुः॥ तद्वर्णं दक्षपूर्वं हि दद्यादेनां गुरूत्तमः१॥
॥ ॥निर्विकल्पोपि शिष्यस्तां गृह्णीयाद्धृष्टमानसः॥तदभावेन सिद्धिः स्यात् देवताशापमाप्नुयात्॥ ॥एतां नैव गह्वररूपां॥

रुद्रयामले॥ ॥गणेशार्कगुहेशानदुर्गारूपासरस्वती॥
महाश्यामामहाविद्यापूजनीयायथाक्रमं॥ नकुर्याद्भेद
मेतेषांकौलिकोवैष्णवस्तथा॥ ॥देवीचक्रेर्चयेत्सर्वाः
शिवलिंगेथवाशिवे॥सालग्रामशिलायांवैसूर्यपीठेथ
वाशिवे॥श्रीगणेश्वरचक्रेवानभेदंकारयेत्सुधी॥ भेदंवै

कुर्वतेयस्तुसशैवःशिवहाभवेत्॥ ॥इतिवचनात्॥ ॥
परमेश्वरीमतेचतुस्त्रिंशतितमपटले॥ ॥
सत्वं रजः तमो रूपपाशत्रयः सोम.सूर्याग्नीनां
त्रयाणांसञ्चाररूपाःपादाः ब्रह्म.विष्णु.महेशाःअ
धस्तात् २ पृथिव्यापस्तथातेजः चतुर्थोवायुसंस्थितः ३

रत्नानि सप्त हस्तानि ३

ऊर्द्धभागस्थिता ह्येते श्रृंगानस्य वृषस्य तु॥ सा
र्द्धत्रीनि स्थिता वामे पुनरत्नानि दक्षिणे नाडी
संचारयोगेन हस्तरूपा व्यवस्थिता॥ द्वौ शिर्षौ
चन्द्रसूर्ययोः॥ योसौ मध्यगता देवि रमनेव चन्द्र
नाहतं॥ मैथुनेन विना तस्य न शब्दो नैव जीवि

तं॥ तस्मात्सर्वप्रयत्नेन मैथुनस्यं सदा कुरु॥ मैथु
ने मोक्षमाप्नोति मैथुने ग्रामतुवर्द्धनं॥ सर्वसिद्धिकरं
देवि मैथुनं परिपथ्यते॥

तिरस्करिणीमन्त्र॥ ॥ह्रीं श्रीं ॐ ऐं क्लीं नमो भगवती त्रैलोक्यमोहनी तिरस्करणी महामाहेश्वरि सर्वपशु जनवाक्‌वंधनी सकलपशुजनवाक्‌चक्षुश्रोत्रजि ह्वाघ्राणवचनात्पाद तिरस्करणी कुरु२ ठठ: स्वाहा॥ तिरस्करणीमन्त्र इति॥ ॥==========॥

१ अथषोडशोपचारपूजाफलं॥ धूपोदहतिपापा दीपोमृत्युविनाशनं॥ अलक्ष्मीनाशयेत्पुष्पं अर्घं दुःस्वप्ननाशनं॥ चन्दनं नाशयेद्दुःखं नैवेद्यं मल नाशनं। विघ्नं चस्तुतिशब्देन ध्यानं चैव महाभयं॥ जापं शोकं विनश्यन्ति व्याधिनाश विसर्जनं॥ ध्यं ठे

नसमयोगेनफलेनकुत्रदोभवेत्॥प्रणामः सिद्धि
संप्राप्तंमंत्रंगौवतुसिद्धिदा॥मुद्रायाग्यायुमुद्धि[illegible]या
त्वानकामभिष्टिना॥षोडशेनानि[illegible]देवार्व
नमिदंमनं॥इतिषोडशोपचारफलं॥१४२जोवदी
१श्रीमत्तुलेशायनमः॥ ॥अथपंचोपचारफलंवक्ष्ये॥ ॥

वदनेनस्यतेदुःखंपुष्पेनतेद्दलक्षिमकं धूपेनस्यानिर्य
पानिदीपात्मत्युविनाशनंमलैनासनकंवैधपारकीर्त्ति
तं॥तुष्टिदंसुनिदंवैविरुत्तंपंचोपचारकंछागतुत्तैमिर्म
मृत्तांजागाईशाइतिस्मृतः॥चतुर्द्धंगोपदंदेवोदीरासंपरि
कीर्त्तितः॥ ॥ डि स्मो ५५५२ म.पु.स्मी भा।